# Vajravilasinisadhana Stava

# वज्रविलासिनीसाधनास्तवः

## Document Information

Text title : Vajravilasinisadhana Stava

File name : vajravilAsinIsAdhanAstavaH.itx

Category : devii, devI, buddha, stava

Location : doc_devii

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods,

Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# वज्रविलासिनीसाधनास्तवः

रविविकस्वरभास्वरसुन्दरीप्रबलकेशरसंवरकर्णिकात् ।
उदयमस्तकशृङ्गसमुल्लसन्नवसुपूर्णशशाङ्ककराङ्किताम् ॥ १॥

विविधपुष्परसासववेद्यपि द्रुतविलम्बितमध्यनदद्ध्वनिः ।
अलिरूपेत्य निशार्धमहोत्सवे धयति तद्गतधीरिति विस्मयः ॥ २॥

उदयतेऽस्तमुपैति निशाकरः पुनरतोऽप्युदयाचलमौलिताम् ।
उभयकोटिकलापिनिरीक्षणे न च शशी न विभाति दिवाकरः ॥ ३॥

रविरुदेति सरोजदलान्तरे शिखरतोऽपि विधुः प्रविलीयते ।
व्रजति चोर्ध्वमसौ वडवानलो गिलति राहुरधः शशिभास्करौ ॥ ४॥

कमलिनीकमलासनलोचनप्रकटगोचरगोचरमीलनम् ।
प्रथममङ्गमिदं कुलिशाम्बुजद्वयनिमीलनमत्र ततोऽपरम् ॥ ५॥

सपदि साधकबीजनिघर्षणात् त्रितयमम्बरमेति चतुर्थकम् ।
सहजमक्षयधामकलावलीकलितकालविलापनलेलिहम् ॥ ६॥

यदि सुशिक्षितवज्रविलासिनीगुरुमुखाधिगमोऽधिगतो भवेत् ।
भवति यस्य तदोत्तममध्यमाधमविनिश्चयमेति स तत्त्वदृक् ॥ ७॥

इति श्रीवज्रविलासिनीसाधनास्तवः समाप्तः ॥

*Vajravilasinisadhana Stava*
pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*